# Bharata Shatakam

# ભારતશતકમ્

## Document Information

Text title : Bharata Shatakam

File name : bhAratashatakam.itx

Category : major_works, shataka

Location : doc_z_misc_major_works

Author : Mahadev Pandey

Transliterated by : Paresh Panditrao

Proofread by : Paresh Panditrao

Latest update : October 7, 2022

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

March 24, 2024

*sanskritdocuments.org*

# ભારતશતકમ્

## ભારતશતકમ્ કાવ્યપરિચયઃ

અમરુશતક-નીતિશતક-સૂર્યશતકીયપરમ્પરાયામિદં ભારતશતકમપિ બાભાતિ સ્વમહિમ્ના । રસોક્તિવક્રોક્તિસ્વભાવોક્તિમય્યાઃ કવિતાત્રિપથગાયા વિલસદનેકતરઙ્ગભઙ્ગયોઽત્ર રસસીકરાસારૈઃ સચેતસાં રોમકઞ્ચુકમઙ્કુરયન્ત્યોઽમન્દમાનન્દં તનિષ્યન્તિ । અત્ર પ્રાયેણાલઙ્કારશાસ્ત્રીયાઃ સર્વેઽપિ સિદ્ધાન્તા અનાહૂતા અપિ દૃઢમુપવિષ્ટા લક્ષ્યન્તે । દેશપ્રેમપ્રવાહાવગાહનનિરતસ્વાન્તસ્ય કવિકુલતિલકસ્યાસ્ય સમસ્તા અપિ સૂક્તયો દેશસ્ય બાહ્યમાભ્યન્તરઞ્ચ સૌષ્ઠવમુદીરયિતું પીયૂષસ્યન્દિનીમિવ નિસ્યન્દયન્ત્યોઽદ્યતનીં પુરાતનીં ચ વૃત્તપ્રવૃત્તિં પ્રવર્તયન્તિ । અત્ર ક્રાન્તેર્ભૈરવો હુઙ્કાર! દમનસ્ય દુર્દમો મદઃ, શાન્તેર્લલિતં વિલસિતં, પરિવર્તનસ્ય પ્રત્યગ્રં વિજૃમ્ભિતં, સનાતનસ્ય નિષ્કમ્પમવસ્થાનં, વર્તમાનસ્યાનાવૃતં સ્વરૂપં, સ્પૃહણીયાભ્યુદયસ્યારુણોદયશ્ચ તથા રઞ્જનમયં ચિત્રિતં યથા જ્ઞાનદશા દ્રષ્ટુર્હર્ષપ્રકર્ષઃ સમ્બોભવીતિ ।

શ્રીમહાદેવ પાણ્ડેયઃ,
સાહિત્યવિભાગાધ્યક્ષઃ,
સંસ્કૃતમહાવિદ્યાલયઃ,
હિ. વિ. વિદ્યાલયઃ,
કાશી ।
ગણતન્ત્રદિવસઃ,
૨૦૩૦ વૈક્રમાબ્દમ્ ।        પ્રથમં સંસ્કરણમ્ ।

## ભારતશતકમ્

આલોલાં કુન્તલાલિં ગલમનુગલિતાં વ્યૂહ્ય ધમ્મિલ્લલીલાં

વ્યાધુન્વાનં સટાગ્રં મૃગપતિમનિશં તીવ્રયન્તી મહોગ્રા ।
મુઞ્ચન્તી ચન્દ્રહાસં ખલવલનિકરે સૈરિભં મૃદ્નતી દ્રાક્
શ્રીશક્તિર્ભારતેઽસ્મિન્નરિ નરિ વિજયા વસ્તુતઃ સાવિરસ્તુ ॥ ૧॥

પ્રત્યક્ષં નિર્જરાણાં સકલસુરગણાધ્યક્ષમાત્મપ્રતીક્ષ્યં
સન્તક્ષ્યાક્ષુદ્રવેગઃ ક્ષતવરુણમદઃ ક્ષીણયક્ષેશદાક્ષ્યઃ ।
વિંશત્યક્ષઃ ક્ષણેનાભજત સમુચિતાં શિક્ષ્યતાં યસ્ય સ દ્રાગ્
રક્ષેદક્ષેમહારી હરિરમરવરૈરીડિતઃ પીડિતં મામ્ ॥ ૨॥

યસ્માદેતે પ્રસૂતા વિવિધતનુભૃતો યેન જીવન્તિ ભૂતા
યસ્મિન્ ગચ્છન્તિ ચૈક્યં સમધિકગુરુતા યત્ર માતુઃ પિતુશ્ચ ।
વિશ્વં સર્વે વિભતિં પ્રકૃતિરયમથો પૂરુષશ્ચ સ્વતન્ત્રો
દેશં તં વા પરેશં સુરવરઝરિણીસુન્દરં કીર્તયામઃ ॥ ૩॥

આ લોલોલ્લોલમાલાકલકલકલિતામ્ભોધિકૂલાલ્લલામાદ્
યાવન્નીહારભૂમીધરધવલશિલાલગ્નભૂસંવિભાગાન્ ।
સીમાન્તાદા ચ વઙ્ગોપસરિદધિપતિં યાવદસ્ત્યેષ સસ્યૈઃ
પત્રશ્યામૈર્દ્રુમાગ્રૈર્વલયિતવસુધો ભારતં નામ દેશઃ ॥ ૪॥

ઇષ્ટો દિગ્ભ્યસ્ત્રયીભ્યઃ સરિદધિપતિભિઃ પાદયોર્વીચિભઙ્ગૈઃ
શૃઙ્ગૈર્લોકોપરિષ્ટાદુદયમધિગતૈઃ સન્નતઃ શૈલરાજૈઃ ।
પર્યાયેણોદ્ભવદ્ભી રસઋતુવિભવૈર્મેદુરશ્રીર્મનોજ્ઞો
રત્નૈ રમ્યઃ સુવર્ણાકરનિકરયુતો ભારતોઽન્વર્થસંજ્ઞઃ ॥ ૫॥

બઙ્ગૈઃ સઙ્ગીતકીર્તિઃ કલિતકલકલશ્ચોત્કલૈરાન્ધ્રબન્ધુ-
ર્મદ્રૈરુન્નિદ્રમુદ્રો જવજનિતજયોદ્ગુર્જરઃ સિન્ધુબિન્દુઃ ।
પઞ્ચાપૈરઞ્ચિતશ્રીર્મધુમધુરધુરો મધ્યયુક્તૈર્બિહારૈ-
રાર્યાવર્ત્તાભિધાનો જયતિ જનપદો માનિનાં જન્મભૂમિઃ ॥ ૬॥

આદ્યોન્મેષાદ્વિધાતુઃ પ્રથમવિકસિતાદાદ્યપદ્માગ્રપત્રા
દારબ્ધા પુણ્યપુઞ્જૈઃ કલુષલવલવેનાપ્યસમ્ભિન્નગાત્રૈઃ ।
દેવૈરપ્યાત્મલાભં શ્રયિતુમતિતરાં વાઞ્છિતા વિશ્વમૂર્તે-
ર્નિર્માણોત્કર્ષસીમા પરમસુષમયા કાપિ નીરાજ્યતે ભૂઃ ॥ ૭॥

ત્રૈકોણી ક્ષેત્રભક્તિર્જ્ઞપયતિ મધુરા વિશ્વચિત્રે યમર્હં
યં સંસ્કુર્વન્તિ રેખાઃ ક્વચિદતિસરલાઃ ક્વાપિ વામા મનોજ્ઞાઃ ।
દેશાનામુર્વરાણાં વિપિનનદનદીવાપ્યયાનાદિકાનાં

સ્થાનં માનં ચ બોદ્ધું ભુવનહિતવિધૌ બદ્ધકક્ષ્યઃ સ દેશઃ ॥ ૮॥

કૃત્સ્નાકૂપારનીરવ્રજજનિતમહાવૃષ્ટિસમ્ભારશોભઃ
કેદારાભોગલેખાશતશતભરિતાસસ્યસમ્પાદદક્ષઃ ।
વલ્લીમાલાલલામદ્રુમવલયલસન્માંસલશ્યામલશ્રી-
ર્લોકાનાં દર્શનીયઃ કૃષકજનહિતો ભારતામ્ભોધરોઽયમ્ ॥ ૯॥

ગીર્વાણૈઃ પુણ્યપુઞ્જો મધુમથનકલાકેલિનારિષ્ટસદ્મ
ક્રીડારઙ્ગઃ પ્રકૃત્યા મણિગણનિકરૈઃ શેવધિર્વૈદવાગ્ભિઃ ।
પૂર્વાભાવાવિશિષ્ટાધ્યયનગુરુકુલં શિક્ષયારમ્ભભૂમિઃ
સંસ્કૃત્યા સુપ્રસૂતિઃ સહજસુકૃતિનામેષ દેશો ગૃહીતઃ ॥ ૧૦॥

ચઞ્ચચ્ચાર્વાકચર્ચો દૃશિવિષયતયા સ્વીકૃતાન્તસ્થબાહ્યો
વિજ્ઞૈર્વૈભાષિકાહ્વૈરનુમિતચરમઃ પ્રાજ્ઞસૌત્રાન્તિકૈશ્ચ ।
યોગાચારાભ્યુપેતાકૃતિધૃતિવિલસદ્વિત્તિમાત્રપ્રપઞ્ચઃ
શૂન્યાધિષ્ઠાનતત્ત્વોદ્ભવનિખિલતયા મધ્યસિદ્ધાન્તસિદ્ધઃ ॥ ૧૧॥

સાઙ્ખ્યૈઃ સઙ્ખ્યાતસખ્યો યમનિયમમયો યોગયોગ્યાઙ્ગસઙ્ગૈ-
ર્ગીતશ્રીર્ગૌતમીયૈઃ ક્વણિતકણકણઃ કોણકાણાદવર્ણૈઃ ।
ગીર્ભિઃ કૌમારિલીભિઃ કલિતકુલકલો ગૌરવીમિશ્રિતાભિઃ
શાન્તો વેદાન્તદાન્તઃ પ્રગુણિતગરિમા ગીયતે કોઽપિ દેશઃ ॥ ૧૨॥

સ્યાદ્વાદો યાવનૈક્યે શ્રુતિપથગમનૈર્મુક્તકચ્છૈર્નિરુક્ત
સ્તન્ત્રસ્થૈર્વામમાર્ગૈઃ સિતતનુદયયા દીયમાને સ્વરાજ્યે ।
કૌટિલ્યં રાજકીયૈઃ કલિતમનુકલં દેશરક્ષાવિધાને
યસ્મિન્નૃત્યન્તિ ભૂયો વિગતખલબલઃ સ સ્વતન્ત્રઃ સમસ્તુ ॥ ૧૩॥

શુક્તીનાં મુક્તિકેવ ત્રિદશસરિદિવ સ્રોતસાં નિર્મલાનાં
ક્ષૌદ્રી ધારેવ હૃદ્યા સરસસુમનસાં વજકાષ્ઠેવ ભૂમેઃ ।
રશ્મીનામૈન્દવાનામમૃતવિપુલતેવાસ્તિ સમ્ભાસમાના
પ્રાચીના દિવ્યધામા દૃઢતમમહિમા સંસ્કૃતિર્ભારતીયા ॥ ૧૪॥

આમ્નાયામ્નાનયોગો દ્યુસદસુદૃઢતાપત્તિસૌધોપયોગો
જયાનિક્ષેપપ્રયોગો નિજજનધરણોદ્યોગદૈત્યાભિયોગઃ ।
દુર્યોગઃ ક્ષત્રજાતે રજનિચરનૃપશ્રીવિયોગઃ સુયોગો
ગીતાયા જીવહિંસાનિરસનકલુષક્રીડયોર્વિપ્રયોગઃ ॥ ૧૫॥

સપ્તાબ્દાનાં શતાનિ પ્રવિકટમભિતઃ પશ્ચિમાતો વિશદ્ભિઃ
    પાતિવ્રત્યે સતીનાં પ્રહરણનિપુણૈર્નૈચિકીક્રવ્યભક્ષૈઃ ।
વિધ્વંસે મન્દિરાણાં કટુકૃતિકુશલૈર્મ્લેચ્છલુણ્ટાકધૂર્તૈઃ
    કેનાભાગ્યેન ઢૂના ધરણિરિયમભૂત્ પાદઘાતાવધૂતા ॥ ૧૬॥

દ્વિત્રા યદ્રાજયોગા નિયતમિહ નૃણાં ભૂપભૂયં વિદધ્યુ
    સ્તદ્દિગ્ભૂપાલયોગાઃ પ્રબલનિપતિતા યત્તેનૌ દિવ્યદિવ્યાઃ ।
એકૈકે લોકલક્ષ્મીનિગડનપટવોઽખણ્ડહેવાકશોભાઃ
    પૂર્ણસ્વાતન્ત્ર્યસિદ્ધૌ સ ખલુ નિજકૃતઃ સઙ્ઘચેષ્ટાવિલમ્બઃ ॥ ૧૭॥

વાચાલં કાવ્યલીલાકૃતિકુશલપિકૈર્ગુઞ્જિતં શાસ્ત્રભૃઙ્ગૈ
    રઙ્ગૈઃ સઙ્ગં વિહઙ્ગૈર્નિખિલકલકલાકામિનીકેલિલોલમ્ ।
શ્રૌતીભિઃ સંવિધાભિર્વ્રતતિભિરખિલં મઞ્જુલં શાલવૃન્દૈ-
    ર્વાગુદ્યાનં સુરાણામિહ ખલુ સુલભં લોભનીયાર્થસાર્થૈઃ ॥ ૧૮॥

ઔર્જી જ્યોત્સ્નેવ શુભ્રા સહૃદયહરણી માધવશ્રીઃ સ્ફુટેવ
    પ્રાતઃસન્ધ્યેવ રમ્યા પ્રતપનશમની બ્રહ્મવિદ્યેવ હૃદ્યા ।
ગઙ્ગેવાદર્શદૃશ્યા શ્રુતિરિવ મધુરા મઙ્ગલાનાં પવિત્રા
    નામ્નાં ધારેવ વિષ્ણોર્જગતિ વિજયતે ભારતી કીર્તિરેખા ॥ ૧૯॥

દેવૈરાપ્યાયિતશ્રીરપિ સુરઝરિણીનિર્ઝરામ્ભઃપુનીતો
    નીતઃ શિક્ષાં બૃહત્યાઃ પતિભિરનુદિનં કીર્તિતો લેખવૃક્ષૈઃ ।
મન્દારૈઃ પારિજાતાદિભિરથ સહરિઃ પુણ્યભોગ્યઃ સુધાચ્છો
    ગન્ધર્વૈર્ગીયમાનો વિલસતિ સકલો ભારતસ્વર્ગલોકઃ ॥ ૨૦॥

યન્નીરં જીવનાર્થં કથયતિ નિખિલે ભૂતલે લભ્યતે ત
    ન્નૈદાઘોન્માથરક્ષાવિધિરથ શુચિતાપાદનં તત્સમસ્તે ।
કીટૈર્નો જાતુ દૂષ્યં ક્વચિદપિ નિહિતં બુદ્ધિવર્ધિષ્ણુ હૃદ્યં
    પુણ્યં તદ્ગાઙ્ગમમ્ભઃ પ્રવહતિ ધરણીં પ્લાવયદ્ભારતીયામ્ ॥ ૨૧॥

પારં પડ્ગોદ્ગમાનાં સુહૃદયમખિલામ્નાયમૂલાગમાનાં
    વાસઃ પૌરાણવાચાં નિધિરયમતુલઃ શ્રેયસાં સન્મણીનામ્ ।
ચારિત્ર્યસ્યોચ્ચદીક્ષા સુજનજનધનવ્રાતસાઙ્ગત્યશિક્ષા
    ધર્મદ્રોરાલવાલં ભરતવસુમતીભૂષણાં તીર્થસાર્થઃ ॥ ૨૨॥

તથ્યં કથ્યં તથાહિ સ્વયમનિશમલં કષ્ટજમ્વાલજાલં
    સંવિત્સિદ્ધિં વિધિત્સન્ પિતૃવનવસતેર્ભૃત્યતામાદધાનઃ ।

ગૃહ્ણન્ સૂનોઃ પટાર્ધે પ્રરુદિતરમણીમન્ત્યસંસ્કારમૂલ્યં
    ધર્માદર્શવ્યવસ્થાં વ્યરચયદતુલાં ભૂપતિર્ગીતકીર્ત્તિઃ ॥ ૨૩॥

વાસો ગીર્વાણવાણ્યા નિખિલજનિજુષાં મોક્ષભૂમિર્મૃતાના
    માર્યાયાઃ સભ્યતાયાઃ પ્રથમનિષદનં મન્દિરં વિશ્વમૂર્તેઃ ।
દુર્ભેદ્યો રાગવન્ધઃ કિલ સુરસરિતો જન્મભૂઃ શાન્તિદેવ્યાઃ
    સાન્દ્રાનન્દાટવીયં જગતિ વિજયતે સર્વલોકૈલક્ષ્મ્યાઃ ॥ ૨૪॥

યદ્વીર્યોપજ્ઞમાસીદ્રજનિચરપતેસ્ત્યાગસીમાવદાનં
    યસ્યારણ્યાન્યબોધિ પ્રથમકવિગુરોર્યેન ચીર્ણં ચરિત્રમ્ ।
અદ્યાપ્યાર્યાભિગુપ્ત્યૈ પ્રભવતિ સકલદ્વાપરોત્તીર્ણકર્મા
    રાજ્યાદર્શપ્રતિષ્ઠાપ્રભવપરિવૃઢઃ કુત્ર રામાવતારઃ ॥ ૨૫॥

શ્રીરામે કૃત્યશક્તિર્વિપુલવિલસિતા લોક્યતે લોકલોકૈ-
    ર્બુદ્ધો નિધ્યાયતેઽદ્ધા ધૃતધિષણધૃતિર્ધીઃ સમૃદ્ધા વિવૃદ્ધૈઃ ।
તાભ્યાં દ્વાભ્યાં શ્રિતાત્મા નૃપનયનિપુણો ભારતોદ્ધારકર્તા
    શ્રીકૃશ્ણઃ સર્વશક્તિઃ સકલનરવરઃ સોઽત્ર પૂર્ણાવતારઃ ॥ ૨૬॥

ગ્રીકાધ્યક્ષં વિજિગ્યેઽદ્ભુતરણનિપુણૈશ્ચાણકામાત્યયોગાત્
    સઞ્જહ્રે યુદ્ધયજ્ઞે કુસુમપુરનૃપં પ્રાજ્યસામ્રાજ્યકર્તા ।
વ્યૂહે જિત્વા સ સેલ્યૂકસમયતનયાં હેલનાં રમ્યરમ્યાં
    શ્રીમાન્ વીરાગ્રગણ્યઃ પ્રથિતગુણગણઃ સ્મર્યતાં ચન્દ્રગુપ્તઃ ॥ ૨૭॥

યત્સામ્રાજ્યં વરિષ્ઠં શશિકરશિશિરં ભારતે સુપ્રતિષ્ઠં
    મૂકાઃ સ્તમ્ભાઃ સુધર્મપ્રવચનપતવોઽદ્યાપિ તિષ્ઠન્તિ યસ્ય ।
ત્યાગી યદ્ભિક્ષુસઙ્ઘોઽકૃષત બહુતરાન્દૂરદેશાન્ સ્વશિષ્યાન્
    સોઽશોકઃ ક્લિષ્ટશોકક્વથિતમૃદુમનાઃ સૌગતૈરાદૃતોઽભૂત્ ॥ ૨૮॥

ચિત્રં ચિત્તૌરદુર્ગે ખલયવનબલૈર્વીવધારોધદૂને
    યુધ્યદ્ભિઃ ક્ષત્રવીરૈઃ પુનરગમદૃઢૈઃ ક્ષીયમાણે ક્રમેણ ।
ભીમેઽપ્યન્તે પ્રશાન્તે પતિચરણરતા પદ્મિની મ્લેચ્છશઙ્કા
    દીપ્તેઽગ્નૌ સઞ્જુહાવ સ્વતનુમલમસૌ સાર્દ્ધમાલીસહસ્રૈઃ ॥ ૨૯॥

ધન્યાસ્તે રાજપુત્રા નિજવિષયગુરુત્વાવને લબ્ધદીક્ષા
    અલ્પીયાંસોઽપિ ધીરા યવનપરભટૈઃ સમ્પ્રહારેઽવસજ્જાઃ ।
નિત્યં યોયુધ્યમાના રિપુદલદલને સત્પ્રતાપપ્રતાપા
    વિશ્વસ્મિન્ સ્વેતિહાસં કનકલિપિમયં નિત્યમસ્થાપયંસ્તે ॥ ૩૦॥

યોઽગૌપ્સીદ્ ગાઃશરણ્યઃ ખલબલલુલિતાન્બ્રાહ્મણાન્સમ્યગાવીત્
 સ્વારક્ષીન્મન્દિરાણિ પ્રયુતશતશિખાઃ પાટ્યમાના અપાસીત્ ।
આર્યક્ષોણીં સમાધાદ્ યવનનૃપમદં પ્રવ્યધાવીત્ સમર્થો
 દિલ્લીમાર્દ્રાં વિડાલીં વ્યધિત શિવવિભુઃ સોઽસ્તુ ભૂયોઽવતીર્ણઃ ॥ ૩૧॥

રાહુગ્રસ્તાં સુધાંશોસ્તનુમિવ વિમલાં વારણેન્દ્રાવધૂતાં
 રમ્યામમ્ભોજરાજીમિવ વનપટલીં લઙ્ઘિતાં વહ્નિનેવ ।
મ્લેચ્છૈરાક્રાન્તપૂર્વાં પ્રવિતતસુષમાં તાં મહારાષ્ટ્રભૂમિં
 જિત્વાઽકાર્ષીત્સ્વતન્ત્રાં તરુણગણનુતૌ સિંહદુર્ગેશ્વરસ્તાત્ ॥ ૩૨॥

પઙ્કાતઙ્કાઙ્કિતાત્મા નિરયરયગતત્રાસસઞ્જાતકમ્પ
 શ્ચૈતન્યાનન્યભાવાનભિમુખહૃદયઃ સઙ્ગમે દેવનદ્યોઃ ।
નિર્વાતિ સ્નાનમાત્રાચ્છ્રુતિરિયમમલા યં વિશિષ્ટં શિનષ્ટિ
 ત્રિસ્રોતઃ ક્ષીણયક્ષ્મા પ્રવિતતમહિમા સોઽસ્તુ ભૂત્યૈ પ્રયાગઃ ॥ ૩૩॥

ચત્વારઃ સ્તમ્ભભૂપા શુભનિકરકરા દિક્ષુ વિભ્રાજમાનાઃ
 કેદારદ્વારવત્યાવથ સમજગતાં નાથરામેશ્વરાહ્વૌ ।
યન્નિષ્ઠં ધર્મસૌધં સુદૃઢમધિગતા વૈજયન્તી જયન્તી
 પુણ્યાયા આર્યજાતે રિપુવશમનિતા ગીયતેઽનન્તકાલાત્ ॥ ૩૪॥

પૂર્ણપ્રાચીપ્રતીચીપ્રચુરસુરુચિરાશેષવિદ્યાનિધાનં
 સ્વાતન્ત્ર્યત્યાગદીક્ષાવિહિતપરિકરો હિન્દુતાપ્રાણભૂતઃ ।
આર્યાવર્ત્તપ્રકાશો હિમકરધવલા માલવીયસ્ય કીર્ત્તિ-
 ર્ધર્મસ્યૈકો નિવાસઃ સ્મરહરનગરીવિશ્વવિદ્યાલયોઽયમ્ ॥ ૩૫॥

ગ્રામાન્ વિધ્વંસય દ્રાગ્ ધુનુ વરનગરાણ્યગ્નિસાદ્ભાવયસ્વા
 શેષાન્ સાઙ્ગ્રામિકાર્થાન્ રિપુકરપતિતાન્ સેતુબન્ધાઁલ્લુનીહિ ।
સ્કન્ધાવારાર્થમેતાન્ વિઘટય વિતતાન્ ક્રોશતાં ક્ષેત્રવર્ગાન્
 નિશ્શસ્ત્રાન્ ભારતીયાન્ કુરુ વત વિદધે શાસકઃ ક્ષોભમિત્થમ્ ॥ ૩૬॥

પ્રધ્વંસો દાસતાયાઃ કથમપિ નિવસન્પ્રાગભાવો વિનશ્યન્
 સામર્થ્યસ્યાખિલાપ્તેઃ સમસમયભવાભાવસત્તા સમગ્રા ।
ધૌરેયસ્વામિતાયાઃ પ્રસભનિપતિતાન્મિત્રરાજ્યાદ્વિભેદો
 દેશેઽસ્મિન્ સુસ્વતન્ત્રેઽનુભવપથગતાઃ ખણ્ડનીયાઃ કુતસ્તે ॥ ૩૭॥

જાગ્રજ્જાજ્વલ્યમાનાનલપટલલલજ્જ્વાલમાલાવલીઢ

વ્યાલોલસ્ફોટનિર્યજ્જ્વલનકણગણાદગ્ધપૂઃક્ષેત્રવૃક્ષાઃ ।
છિન્નાર્થા રિક્તશસ્ત્રાઃ પરિત ઇહ વૃતા ઘોરશસ્ત્રાસ્ત્રસજ્જૈઃ
પ્રાણાંસ્ત્યક્ત્વાપિ ભૂમિં પ્રવલપરવલૈર્મા મુચન્ ભારતીયાઃ ॥ ૩૮॥

ભીષ્યન્તાં વ્યોમયાનૈર્જ્વલદનલવલદ્વોલઘોરાવમર્દૈ-
ર્દાહ્યન્તાં વહ્ન્યગારૈરભિત ઇહ ચલદ્દ્રુમુખ્યાયુધેદ્ધૈઃ ।
રુદ્ધ્યન્તાં યોધલક્ષૈઃ ક્ષપિતપરવલૈઃ પૂર્વતઃ પશ્ચિમાદ્વા
સ્વાતન્ત્ર્યં સંલભેરન્ નિજતનુહવને પણ્ડિતા ભારતીયાઃ ॥ ૩૯॥

કસ્મૈ હન્તાસ્તિ કથ્યા નિજવિષયભવા પારતન્ત્ર્યપ્રસૂતા
સઙ્કષ્ટેયં દશા ભો ગૃહનગરભવદ્દાહલુણ્ઠાભિયોગૈઃ ।
વેત્રાઘાતૈઃ કશાભિર્વિશસનજનિતત્રાસવિક્ષોભણાભિ-
ર્વ્યગ્રસ્ત્રીબાલવૃદ્ધાતુરનિખિલજના કસ્ય પુંસો વિનાશ્યા ॥ ૪૦॥

દાન્તો દાહૈર્ગૃહાણાં હરણવિશસનૈસ્ત્રાસિતઃ સર્વનાશૈ-
ર્નીતો વિક્ષોભદૈન્યં ગગનડયનકૈર્યાનસાર્થૈઃ પતદ્ભિઃ ।
ગોલાઙ્ગારૈર્નિદગ્ધો વિકલવિલુલિતો ઘાતકૈસ્તૈરુપાયૈઃ
સ્વાધીનત્વાય માર્ગં પ્રતિદિનમયતેઽથાપિ કોઽપ્યાર્યદેશઃ ॥ ૪૧॥

ઐશાન્યામુગ્રરૂપો ગ્રસતિ વસુમતીં ભારતીયાં રણાગ્નિ-
ર્વ્યાદાયાસ્યં કરાલં કવલયતિ ભૃશં પૂર્વતોઽકાલકાલઃ ।
સર્વે કષ્ટં સહન્તે પ્રતિદિનમનિશં વર્દ્ધિતૈર્વસ્તુમૂલ્યૈ-
રેકસ્મિન્માસિ ગાવઃ પ્રયુતસમધિકા હન્યમાના ભવન્તિ ॥ ૪૨॥

દૂરં નીતા વિદેશે સમરહુતવહે હૂયમાના મુધૈવં
સમ્પ્રત્યાર્યાઃ પ્રવીરા નિજનિજજનની રોદયન્તોઽતિલક્ષાઃ ।
છિન્નઃ સૌવર્ણરાશિર્યવનનૃપધરાસ્વામ્યપસ્પર્શજાતીઃ
સમ્ભેદ્યાસ્તેઽદ્ય નીતિર્નિગડિતમતયો રાષ્ટ્રભક્તા નિબદ્ધાઃ ॥ ૪૩॥

દારિદ્ર્યોદ્દામદાવાદહનદરદલદ્દાનવૈર્દૂયમાના
દુર્વારદ્વેષદુઃખોદયદમનદૃઢદ્યોતનૈર્દાન્તદીનાઃ ।
દુર્દૈવોદ્યોગદીર્ણા દિતદિતિજદયોદન્તદૂરપ્રપદ્યા
માદ્યન્માન્દ્યૈર્દુરીશૈઃ પ્રતિદિવસમહો હિન્દવો નાદ્રિયન્તે ॥ ૪૪॥

લોલૂય્યન્તે લલામાઃ પ્રતિકલમતુલાન્દોલનૈઃ શાલમાલા
લીલાવલ્લીમતલ્લીવલયવલયિતાઃ સત્ફલાસ્તે રસાલાઃ ।
લોક્યન્તે હાર્યલોકૈઃ કલિતવિકલિતૈસ્તત્સ્થલે લઙ્ઘિતાનિ

બાર્વૂરાણિ ક્રમેલાકુલહૃદયતલાન્યાલવાલાનિ તાનિ ॥ ૪૫॥

ઊર્જાભિસ્તર્જનાભિર્જયજનિતજયોદ્ગર્જિતસ્ફૂર્જિતાભિ-
ર્ભર્જાભિર્જર્જરાભિર્જ્વરજનિતજરાજીર્ણનિર્જ્વાલનાભિઃ ।
જઙ્ઘાલૈર્જ્વાલજાલૈરગજગદખિલં ભૂર્જભર્જં સૃજદ્ભિઃ
ખર્જૂરા નૈવ સર્જા જિતજનિમનુજા નિર્જરાસ્તૈર્વિવર્જ્યાઃ ॥ ૪૬॥

સ્વાતન્ત્ર્યં ક્વાપિ લીનં વિજયસહભવા શૂરતાસ્તં પ્રપન્ના
સોત્સેધોત્સાહભૂમા વિલયમુપગતા શ્રીઃ સમજ્ઞાન્તમાપ્તા ।
નો પુંસ્ત્વસ્યાદ્ય ચર્ચા સુચરિતનિકષો માન ઉચ્ચૈર્વિભગ્નો
ભૂયાંસસ્તાનભઙ્ગા ભરતભુવમિમાં યદ્વિભેત્તું પ્રવૃત્તાઃ ॥ ૪૭॥

હંસાયન્તેઽદ્ય કાકા મલિનસહયુજઃ કેસરીયન્તિ કોલા
બાષ્પાયન્તે શ્વસન્તઃ પુરુષતનુભૃતઃ સર્વતો રુદ્ધચેષ્ટાઃ ।
સામ્રાજ્યં વીણયન્તિ પ્રતતબલમદોન્માથદમ્ભા મહીશાઃ
ક્ષીરસ્યન્તિ પ્રરુગ્ણા અધરચિકુરિતાશ્ચાધુનોત્પુચ્છયન્તે ॥ ૪૮॥

કોટીનાં વિંશતી દ્વે મનુજતનુભૃતાં પાદપદ્માવનમ્રે
વિંશ્યામસ્યાં શતાબ્દ્યાં સમુચિતવિવિધાસ્ત્રાવસજ્જે કદા નુ ।
સ્વાતન્ત્ર્યોત્સાહપૂર્ણે દ્વિગુણબલભૃતે સ્વર્ણસિંહાસનસ્થાં
વન્દેતાં દેશલક્ષ્મીં મૃદિતવિલુલિતદ્વેષિવાહીકસૈન્યે ॥ ૪૯॥

ચત્વારિંશત્સદર્પાઃ સહજબલભૃતઃ કોટયો ભારતીયા
ગઙ્ગૌઘાઃ પ્રાવૃષેણ્યા ઇવ લુલિતતટા વ્યશ્નુવાનાઃ સમન્તાત્ ।
સ્વાતન્ત્ર્યપ્રાપ્તિકામા નિગડિતચરણાં માતરં મોચયન્તે
જાતૈક્યા ઉત્પતેયુઃ કિમિવ પરબલં વારયેત્ ત્યક્તદેહાન્ ॥ ૫૦॥

દૃપ્યદ્ધ્વાન્તાવમગ્ના પ્રખરરવિકરોત્તપ્તકેદારષણ્ડે
શ્રામ્યન્ત્યુત્થાપિતાભ્રિર્ધરણિનિખનને તત્પરા ક્ષામવર્ષ્મા ।
વક્રૈડૂકે વસન્તી વિનમિતપટલે ધૂલિપૂર્ણે નિકાય્યે
ગ્રામાણાં સપ્તલક્ષી હૃતસમવિભવા સામ્પ્રતં ભારતેઽસ્મિન્ ॥ ૫૧॥

ગ્રામાણાં સપ્તલક્ષી વસતિ બત નિજેઽપ્યાસ્પદે પ્રોષિતાઽસ્મિન્
યસ્મૈ કસ્મૈચિદિચ્છાવશત ઇયમભૂદ્દીયમાના ધનાય ।
સ્કન્ધાવારાર્થમેષા હૃતગૃહવિભવોત્સાર્યતે નાથહીના
દેશસ્ય પ્રાણભૂતા મૃગયુવશગતા ગૌરિવ ક્લિશ્યતીહ ॥ ૫૨॥

સ્યાત્કશ્ચિત્તન્નિમેષશ્ચતસૃષુ પરિતો દિક્ષ્વપૂર્વાં વિતન્વન્
જાગર્તિ સંહરન્તીં સરભસમખિલાંસ્ત્રાસલોભાદિદોષાન્ ।
પ્રાણાન્તત્યાગધૈર્યં નિજવિષયવલદ્ભક્તિમાગૂરયન્તીં
સ્વાતન્ત્ર્યપ્રાપણશ્રીઃ સકલજનમતૌ ભાવપૂર્તિં દધાનઃ ॥ ૫૩॥

યે વા કે વા ભવેયુઃ પુનરધિપતયસ્ત્રાસયિત્વાત્યસહ્યાઃ
કાંશ્ચિન્માસાન્ સમા વા પુનરધિકમિમે નાત્ર દેશેઽધિકુર્યુઃ ।
સદ્યો ભાવી સ્વતન્ત્રઃ સરિસરદખિલોદ્યોગસમ્ભારપૂર્ણો
વિજ્ઞાનોદ્ગીતકીર્ત્તિસ્તડિદતિધવલઃ શૌર્યવીર્યોર્જિતાત્મા ॥ ૫૪॥

કારાવાસપ્રસોઢોત્કટવિકટમહાયાતનોગ્રા ભુશુણ્ડી-
ર્ગર્જ્જન્તીસ્તાઃ શતઘ્નીર્જ્વલનકણમુચો નિર્ભયં સમ્પ્રવિશ્ય ।
વામં ચાધાય પાદં રિપુશિરસિ બલાદ્ બદ્ધહેવાકભાવા
સંસત્કાચિદ્ વિજેત્રી ભજતુ નિજભુજૈઃ પ્રાજ્યસૌરાજ્યલક્ષ્મીમ્ ॥ ૫૫॥

સત્યાસક્તઃ સિતાત્મા કવિકૃતિનિપુણો વૃત્તગોવર્ધનશ્રીઃ
કૃત્વા ચક્રં કરાગ્રે ગતિવિગતિજુષાં નેત્રદાનૈકશક્તઃ ।
એકો યઃ કર્મયોગી નિખિલહિતવિધૌ બદ્ધકક્ષ્યઃ શ્રિતેશઃ
સોઽવ્યાદવ્યાજભવ્યઃ સકલનરવરો મોહનો દેશમેનમ્ ॥ ૫૬॥

પર્જન્યો યસ્ય જન્યં ધૃતમનલહુતં લિપ્સતેઽભીષ્ટવૃષ્ટ્યૈ
શુદ્ધં સમ્મુગ્ધદુગ્ધં રચયતિ રુચિરાં સત્ત્વસમ્પત્તિવૃત્તિમ્ ।
આયુર્ભુક્તં સમાનાં શતમિહ તનુતે પ્રાજ્યમાજ્યં પ્રજાનાં
સાનન્દં વલ્ગદાસ્તાં પ્રતિદિશમતુલં ધૈનુકં ભારતે તત્ ॥ ૫૭॥

દેવેન્દ્રઃ પૂર્વદેવૈરસકૃદધિજિતો ન પ્રિયોઽભૂત્ સ્વભક્તઃ
કૈલાસો રાવણેનોલ્લસિત ઇતિ પદે સ્વેઽપ્યતૃષ્ણોઽખિલેશઃ ।
નેપાલાધીશ્વરેણાનિશમુદયજુષા નિઃસપત્નેન તુષ્ટ
શ્ચાઞ્ચલ્યાતઙ્કમુક્તઃ પશુપતિરવતાત્ કાઠમાણ્ડૂનિવિષ્ટઃ ॥ ૫૮॥

સૂર્યાચન્દ્રપ્રકાશસ્થગયદતિઘનધ્વાન્તસચ્છાદિતાન્ધે
ધાવાભૂમી સમગ્રે વિદધત ઉરવો મેઘષણ્ડા અખન્ડાઃ ।
ધારાસમ્પાતવર્ષાસ્રવદમલલસદ્બિન્દુભિઃ પ્લાવયન્તઃ
સૃષ્ટિં નૂત્નાં વિધાતુઃ પુનરતુલવલાઃ કર્તુમેતે સુસજ્જાઃ ॥ ૫૯॥

આપઃ સમ્પાદયન્તી વરવિમલતરા સુન્દરામ્ભોરુહાણ્યુ
ત્ફુલ્લાનિ દ્યોતયન્તી ત્વરિતગતિવહા આપગા મન્દયન્તી ।

તારાતારૈઃ પ્રદીપ્રં વલયિતસુષમં સાધયન્તી વિહાયો
 વીરાનુત્સાહયન્તી લસતિ દિશિ દિશિ ક્રીડનીયા શરચ્છ્રીઃ ॥ ૬૦॥

ગોધૂમાદભ્રભાગાઃ સહજસહયુજાં ક્ષેત્રમાલાઢકીનાં
 કેદારાઃ સર્પપાણાં યવચણકજુષાઃ સન્મસૂરાભિભાજઃ ।
ભક્તિઃ સાતીનકાનાં વિલસદતસિકાશ્યામિકાશ્યામલશ્રીઃ
 સાશ્ચર્યૈશ્વર્યસીમા પ્રમુદિતમહિમા હૈમની ભાતિ ભૂમિઃ ॥ ૬૧॥

શ્રીપઞ્ચમ્યાં તપઃશ્રીસ્તુહિનજડતયા નામ્રપુષ્પાણિ સૂતે
 ન સ્પન્દન્તે સમીરાઃ સુરભિતતનવો નાલયો યાન્તિ મોદમ્ ।
નોદ્દીપ્તઃ સૂનધન્વા ભુવનજયમહઃ કર્તુમિચ્છાં બિભર્ત્તિ
 નાક્રી સઙ્ક્રાન્તિરેષા પરભૃતવિરુતૈરર્ચ્યતાં કસ્ય હેતોઃ ॥ ૬૨॥

અત્યન્તોત્તપ્તપાંસુક્ષિતિતલમખિલં વ્યાકુલં કલ્પયદ્ભિ-
 ર્નિઃશેષાં નિઃશલાકાં તૃષિતમૃગકુલોલ્લાસનીમાદધાનૈઃ ।
શ્રોત્રોત્તોદં સ્તનદ્ભિઃ સકલમિહ જનં ક્ષોભયિત્વોષ્ણવાતૈ-
 ર્મધ્યાહ્નોચ્ચણ્ડસૂર્યસ્તપસિ વિજયતે સ્વાતપૈઃ સપ્રતાપૈઃ ॥ ૬૩॥

ચઞ્ચચ્ચન્દ્રાભ્રદીર્ઘોજ્જ્વલવિમલલસદ્વિર્ત્તિદીવ્યદ્વિતાન
 સ્વાધ્યાયાચાર્યસૌધાકરકિરણગણાશ્લિષ્ટસર્વાઙ્ગગૌરમ્ ।
મલ્લીમાલાલલામં વિકસિતપટલાપાટલામોદમુગ્ધ
 મૌઘાનં ચક્રવાલં હરતિ નિશિ હૃદાં પ્રાણિનાં ભારતીયમ્ ॥ ૬૪॥

ઉન્માદ્યચ્ચન્દનશ્રીસુરભિતસુરભિપ્રત્યુષઃશાન્તિકાન્ત્યા
 કિર્મીરૈર્લોલકીરૈર્લલિતખગકુલાનીરયદ્ભિઃ સમીરૈ ।
ઔલ્લાઘ્યં વેલયદ્ભિઃ પૃથુકયુવવયોઽતીતલોકાઃ પ્રબુદ્ધાઃ
 ખેલન્ત્યુદ્દીરયન્તે નિજવિષયનિજાયત્તતાં ભાવયન્તિ ॥ ૬૫॥

ચન્દ્રાઙ્કાત્સઙ્ગૃહીતં નવજલદકુલાદાહૃતં પુષ્કરાદ્વા
 સન્નીતં કૃષ્ણિમાનં ધૃતવતિ પરિતો વ્યશ્નુવાને તમિસ્રે ।
હ્રાદિન્યા દર્શયન્ત્યા કનકકષલસત્સ્નિગ્ધયા વર્ત્મભેદાન્
 વર્ષાક્ષેત્રાભિગુપ્ત્યૈ નિશિ કૃષકગણાઃ સાભ્રયઃ સઞ્ચરન્તિ ॥ ૬૬॥

એતાદૃક્ષેઽન્ધકારે ન દદતિ કિમપિ દ્રષ્ટુમન્ધે નિતાન્તં
 દૌર્બલ્યે જાગ્રતિ દ્રાક્ પ્રસરતિ પરિતઃ સ્વાન્ સ્વકીયાન્ સમસ્તાન્ ।
આસ્થાયૈકં ત્રિલોકીભરણપરિવૃઢં સ્વપ્રકાશં પરેશં
 યોદ્ધવ્યં સર્વશક્ત્યા સકલસમુદિતૈર્હિંસયાઽહિંસયા વા ॥ ૬૭॥

ધર્મસ્યાત્યન્તનિષ્ઠા સહજસુચરિતસ્યૈકમાત્રપ્રતિષ્ઠા
    સત્યસ્યોત્કર્ષકાષ્ઠ નયવિનયમહારમ્ભનીતિર્વરિષ્ઠા ।
ધૈર્યપ્રષ્ઠાર્યરીતી રિપુવિજયમહાશ્ચર્યચર્યા પટિષ્ઠા
    શ્રેષ્ઠા સ્ફેષ્ઠા ગરિષ્ઠા પવનસુતગુરોઃ કાપિ દૃષ્ટિઃ શુચિષ્ઠા ॥ ૬૮॥

ભોગાવાસોઽપિ મોક્ષાદ્ભુતસદનમલં દેવભાષાપ્રિયોઽપિ
    નાનાપભ્રંશનિષ્ઠો યવનગણવૃતોઽપ્યાર્યજાતિપ્રતિષ્ઠઃ ।
સ્વાતન્ત્ર્યપ્રાપ્તિકામોઽપ્યતુલવિઘટિતાનેકલોકાભિભૂતો
    દેશોઽયં સાર્વભૌમીં કથમિહ લભતામાદિમાં કીર્તિરેખામ્ ॥ ૬૯॥

નિર્વાર્ય્યાઃ શક્લશુક્લા નિકૃતનિરસિતાનન્દનાઃ શિશ્વિદાના
    નીત્યન્તર્વાણિકાર્મા વિસૃમરયશસો વાગ્મિનો જાગરૂકાઃ ।
સામ્રાજ્યોન્નાથહારાઃ કૃશતનુસહજસ્ફીતવિત્તપ્રભાવા
    શ્ચાર્વાઘાટાઃ કુશાસ્તેર્ભરતવસુમતીમાતૃપૂજાનદીષ્ણાઃ ॥ ૭૦॥

સ્વાતન્ત્ર્યોજ્જ્વાલમાલાનલસુહુતનિજપ્રાણસર્વસ્વશૌણ્ડાઃ
    કારાયાં જગ્મિવાંસસ્તદનુ ચ વિપદાં સાહયઃ સ્વાયતીનામ્ ।
ભૂયાંસઃ ક્ષીણકાયક્ષયગદમૃદિતાઃ પેસ્વરાઃ કષ્ટમાર્ગે
    શ્રદ્ધેયા ભારતીયાઃ સુખવિભવભૃતો ભસ્ત્રિકાશ્ચાપરે સ્યુઃ ॥ ૭૧॥

ગુઞ્જદ્ભૃઙ્ગાલિગીતૈઃ શ્રુતિસુખમધુરૈઃ કૂજદાલોહિતાક્ષૈ
    શ્ચૂતાસ્વાદાતિરિક્તસ્વરમુખરપિકૈર્માધદામોદવાહૈઃ ।
પુષ્પાણાં પાવમાનૈઃ પ્રકૃતિવરવધૂનૂતનાક્રીડમુગ્ધં
    દિગ્ધં શોભાભિરામં કુશલકૃતિકલોલ્લાસિતં ભારતં નઃ ॥ ૭૨॥

ભાયાદ્ભૂયઃ પ્રભૂયાદ્ભવવિભવભરૈઃ સમ્ભ્રિયાદ્ભૂતિભાવૈ-
    ર્ભૂષ્યાદ્ભવ્યૈઃ સ્વભાવૈર્ભુવનમુભયતો ભાવનાં ભૂરિભાસમ્ ।
ભજ્યાદ્ભજ્યાત્પ્રભાવોદ્ભવભરિતભુવો ભૂપતીન્ ભૂતભાષાન્
    ભુજ્યાદ્ભોગાન્ પ્રભૂતાન્ ભવિકભરતભૂર્ભાગ્યભૂમા પ્રભૂતા ॥ ૭૩॥

યત્તપ્તં નમ્રતાયૈ પ્રભવતિ સતતં લોહમેતત્ પ્રસિદ્ધં
    ભૂમિસ્તપ્તૈવ સદ્યો જનયિતુમખિલાનઙ્કુરાગ્ શાશકીતિ ।
તસ્માદન્તર્દધાના જ્વલનખરશિખા એવ સદ્ભારતીયાઃ
    સ્વાતન્ત્ર્યં સાધયેયુઃ સ્વસુખનવસુધામોદમોહાન્નિવૃત્તાઃ ॥ ૭૪॥

આર્યાવર્ત્તાભિધાને વસુમતિ મધુરે માતરુન્નિદ્રલીલે

ત્વાં સમ્યક્ સર્વભૂતિં નિખિલકલકલાજ્ઞાનવિજ્ઞાનપૂર્ણામ્ ।
શસ્ત્રૈરસ્ત્રૈર્વિમાનૈર્નિજજનજનિતૈર્જાતરૂપાં ભવાનીં
કુલ્યાભિઃ સિચ્યમાનાં દિશિ વિદિશિ શુભાં શ્યામલાં ભાવયામઃ ॥ ૭૫॥

ન સ્યાત્ કશ્ચિદ્ દરિદ્રો વસનવિરહિતો નૈવ મૂર્ખો ન લુબ્ધો
જાત્યા કશ્ચિત્ સમાજે ન ભવતુ પુરુષઃ સ્ત્રી તથા માનહીનઃ ।
સર્વે સ્યુઃ સુસ્વતન્ત્રાઃ સકલસુખભૃતઃ પૂર્ણવિદ્યાઃ પ્રસન્નાઃ
સોત્સાહાઃ સ્વસ્થદેહા ભવવિભવભરૈઃ સમ્ભૃતાઃ સંસ્ફુરન્તઃ ॥ ૭૬॥

શાન્તે દાન્તે નિતાન્તં શશધરધવલે ધૈર્યધુર્યે ધરિત્રિ!
પૂતે પૂતપ્રતાપે મણિજટિલમહાસિંહપીઠપ્રતિષ્ઠામ્ ।
સ્વાયત્તાં સ્વસ્થચિત્તાં સુચરિતનિકષોચ્ચૈશ્ચરિત્રાં વિચિત્રાં
માતસ્ત્વાં ચિન્તયામો નવનવલસિતોદ્યોગસમ્ભારપૂર્ણામ્ ॥ ૭૭॥

કુલ્યાભિઃ કૂપષણ્ડૈર્વહદમલજલૈર્નાલિકાભિઃ સુસિક્તાં
કેદારાભોગભવ્યાં દલકુસુમફલોલ્લાસિવલ્લીદ્રુમાગ્રામ્ ।
કુણ્ડોઘ્નીચર્વ્યમાણૈઃ શિશુતૃણનિચયૈર્વત્સભદ્રાભિરામૈ
રોરુચ્યાચાન્તસીમાં પરવિષયનુતાં દ્રષ્ટુમીહામહે ત્વામ્ ॥ ૭૮॥

યન્ત્રવ્યૂહૈર્નદદ્ભિશ્ચલદલવિસરૈર્વિશ્વતો વ્યાપ્તશોભૈ-
ર્વસ્ત્રવ્રાતાઁસ્તથાસ્ત્રવ્રજગગનચરસ્યન્દનાન્ બાષ્પયાનમ્ ।
સઙ્ખ્યાતીતં વિચિત્રં નિખિલજનમનોઽપેક્ષ્યવસ્તૂનિ નાના
તન્વાનૈર્માતૃભૂમે! ભગવતિ! ભવતીમીશ્મહે જાત્વવામુમ્ ॥ ૭૯॥

આકાશં વ્યોમયાનૈઃ સ્થગિતવતિ મહાદીર્ઘકાયૈઃ સહસ્રૈ-
ર્બાષ્પૈઃ સૌદામનીભિર્વિરચિતગતિભિર્ભૂવિભાગાનનોભિઃ ।
પોતૈરબ્ધીન્ સ્રવન્તીર્વિધુતવતિ રિપુસ્તોમમાત્માધિપત્યે
ધ્યાયામસ્ત્વાં જનાનાં જગતિ નિવસતાં પઞ્ચમાંશેન પૂર્ણે ॥ ૮૦॥

અર્થાધિક્યાભિસાધ્યાયુધવરરચનાઘોરસામર્થ્યસમ્પ
દ્યોગાવાપ્યાન્યદેશોન્નતપદમહિમોત્કર્ષસમ્ભાવિતત્વાત્ ।
ઉન્મૂલ્યોદ્દણ્ડશત્રુપ્રતિભટજનતાયોગ્યસઙ્ખ્યાશ્રયત્વાદ્
યસ્યાખણ્ડત્વમિષ્ટં વિમલમતિમતાં શ્રદ્ધયા તં સ્તુવીમઃ ॥ ૮૧॥

શ્રદ્દધ્મસ્તત્ર પૂજાં ચિરમભિલષિતાં તસ્ય કુર્મઃ પરસ્માદ્
વાઞ્છામો નૈવ તસ્માદમૃતમપિ શુભાન્યર્થયામોઽથ તસ્મૈ ।
તેનોત્કર્ષં શ્રયામસ્તમિહ જનપદં સાધુવાદં વદામઃ

સ સ્યાત્સર્વા વિભક્તીર્દધદમલતરા મે સુવાચાં સમાસામ્ ॥ ૮૨॥

પારોક્ષ્યં કેચિદીયુર્નિજનુતિવિષયં કેવલં મુક્તિસિદ્ધ્યૈ
પ્રાત્યક્ષ્યં ચૈકમન્યે કવનસમુચિતં ભુક્તિલાભાર્થમાપુઃ ।
વિદ્વાંસો વસ્તુતસ્તુ પ્રવચનરચનાચારુચાતુર્યયોગ્યં
સ્વં દેશં જન્મભૂમિં મતિસકલબલૈઃ સર્વથા સંશ્રયન્તે ॥ ૮૩॥

કીરા હેમ્નોઽપિ બદ્ધાઃ શુચિરુચિરુચિરે પઞ્જરે નાત્ર તુષ્ટા
મુક્તાઃ સદ્યો વિહાયઃપરિચરણમમી પ્રારભન્તે સ્વતન્ત્રાઃ ।
યત્સત્યં ભારતીયાઃ કતિ કતિ ચ શતીઃ પારતન્ત્ર્યેણ નીત્વા
સ્વં રાજ્યં સાધયન્તે વસુપશુધરણીજીવનં વાસ્તુ મૂલ્યમ્ ॥ ૮૪॥

સમ્પૂર્ણો વેદરાશિર્ધ્રુવમયમધુના મન્ત્રવિપ્રદ્વયાત્મા
ત્યાગાસ્તોષાસ્તપસ્યાશ્ચિરતરનિચિતા નૂનમેષોઽવભાતિ ।
ધર્મ્યા રાજન્યનીતિર્વિપુલિતમહિમા કર્મશક્તિઃ સમગ્રા
પુણ્યં વૈ કલ્પકોટિપ્રતતમતિલસદ્ભારતે ધર્મસઙ્ઘઃ ॥ ૮૫॥

ગાવઃ સર્વોપકારાઃ પ્રકૃતિસુમધુરાઃ પુણ્યનદ્યઃ સમસ્તાઃ
પૂતાઃ શૈલાઃ સમગ્રાઃ શુચિરુચિરુચિરા નૈકભેદા અટવ્યઃ ।
પારાવારાઃ પવિત્રા અખિલમતિમહન્મણ્ડલં તીથસીમ્નાં
દેવાગારાણ્યનન્તાન્યમિતનિધિરયં ભારતસ્યાવિરસ્તુ ॥ ૮૬॥

સૃષ્ટિસ્થિત્યન્તકર્તા ચિદમલમહિમા જ્યોતિષાં જ્યોતિરેકં
સર્વાધિષ્ઠાનમૂર્તિર્વિઘટિતઘટનાશક્તયાનન્તશક્ત્યા ।
કોટીર્બ્રહ્માણ્ડખણ્ડાન્ ક્ષણત ઇહ સમાભાસયન્નૈકરૂપાં
ક્રીડાં તન્વન્ વિભાતિ પ્રભવતુ સ વિભુર્ભૂતયે ભારતસ્ય ॥ ૮૭॥

સ્વાતન્ત્ર્યૈકાન્તનિષ્ઠા પ્રચુરશુચિરુચિર્દૂરદૃષ્ટિર્ગભીરા
ધીરાઽઽભેદ્યા મહાબ્ધીન્ નુતસતતકૃતિઃ પારયિત્વા ફલન્તી ।
એકા વિસ્રમ્ભભૂમિર્નિખિલવિષયિણાં જાગરાં સંસૃજન્તી
રાષ્ટ્રેષુ પ્રાક્તનેષુ પ્રબલસમુદિતા ભારતી રાજનીતિઃ ॥ ૮૮॥

પારેવાગ્વર્ત્તિરૂપં વિપુલવિલસિતં જ્ઞાનવિજ્ઞાનગર્ભં
પારાવારાભિરામં ત્રિદશગણમહાભારતીસન્નિબદ્ધમ્ ।
પ્રાગૈતિહ્યૈકગમ્યં સમસમયહિતં વિશ્વભાષાપ્રભાવં
રાજદ્વિદ્યાલયશ્રીઃ કિમપિ વિજયતે વાઙ્મયં ભારતીયમ્ ॥ ૮૯॥

દૂરે દુર્ભિક્ષવાર્ત્તા જનગણવિષમા ક્વેતિ ભીતિર્નિરસ્તા
　　ન શ્રૂયન્તે કદાપિ ક્વચિદપિ સહસા દાસ્યવાઃ સન્નિપાતાઃ ।
નાઽન્યાયસ્ય પ્રવૃત્તિં દ્વિષદપિ સહતે નૈવ મિથ્યાભિયોગઃ
　　સ્વાતન્ત્ર્યે જાતમાત્રે પ્રગુણિતગરિમા દ્યોતતે ભારતશ્રીઃ ॥ ૯૦॥

લોકેષ્વાકાલમૃત્યુર્ન ચરતિ ન ભવન્ત્યાધયો વ્યાધયો વા
　　નૈવાઽઽલસ્યાદિદોષાસ્તરુણિમનિ નૃણાં વૃદ્ધિસિદ્ધ્યન્તરાયાઃ ।
ન દ્યૂતં નાપિ મદ્યં મલિનગુણગણા નાપિ દોષપ્રવૃત્તિ-
　　ર્દિવ્યેઽસ્મિન્નાર્યદેશે પ્રથિતમહિમનિ ભ્રાજતે ધર્મલક્ષ્મીઃ ॥ ૯૧॥

સૌરાજ્યેઽસ્મિન્પ્રતિષ્ઠાં ગતવતિ ચરમાં સ્વર્ણસિંહાસનસ્થા
　　નીરાજ્યેતાઽઽર્યલક્ષ્મીસ્તરુણપરિવૃઢૈઃ સાધિતાર્થોલ્લસદ્ભિઃ ।
અસ્ત્રૈઃ શસ્ત્રૈર્વિમાનૈરુડુપશતશતૈરન્તરાહિત્યસૈન્યૈ-
　　ર્નચ્છેદ્યૈર્નાપિ ભેદ્યૈઃ સુચરિતનિકષૈ રક્ષિતા દુષ્પ્રધર્ષા ॥ ૯૨॥

પ્રાજ્યૈરાજ્યૈઃ પયોભિઃ પ્રતિગૃહમનિશં જાયમાનૈરમેયૈઃ
　　ખાદ્યાન્નૈઃ ક્ષેત્રવર્ગેષ્વતિવિપુલમહારાશિભિઃ સમ્ભવદ્ભિઃ ।
ધન્યા સ્વાતન્ત્ર્યલક્ષ્મીઃ સુવસનનિચયૈર્યન્ત્રસઙ્ઘાતસિદ્ધૈ
　　રત્નૈર્નાનાખનિભ્યઃ પ્રતિદિશમતુલૈર્નિઃસૃતૈરદ્ય દૃશ્યા ॥ ૯૩॥

વિદ્યાવિદ્યોતમાનૈર્નયવિનયતપસ્ત્યાગવાગ્મિત્વભાગ્ભિ-
　　ર્નિર્ભીકૈર્ન્યાયનિષ્ઠૈઃ સુચરિતવિભવૈઃ સત્યસન્ધૈઃ પ્રશસ્તૈઃ ।
શૂરૈર્વીરૈર્બહુજ્ઞૈરતિવિમલયશોરાશિભિર્ધર્મશીલૈઃ
　　સભ્યૈઃ પૂર્ણાવિરાસ્તાં સતતવિજયિની ભારતી લોકસંસત્ ॥ ૯૪॥

સ્વારાજ્યં સ્યાત્સ્વરાજ્યં ભરતવસુમતી સ્યાદખણ્ડા પ્રપૂર્ણા
　　દિવ્યપ્રજ્ઞાસમજ્ઞાઃ પ્રબલવિજયિનો ભાન્તુ સર્વે યુવાનઃ ।
વિદ્યાવાસાઃ સમસ્તાઃ સુચરિતવિભવૈશ્છાત્રવર્ગૈઃ સમૃદ્ધા
　　ગ્રામે ગ્રામેઽભિરામા હરિતતૃણભૃતો ગોચરાઃ સન્તુ ગોભિઃ ॥ ૯૫॥

શાન્તિઃ કાન્તિર્નિતાન્તં પ્રમુદિતજનતાસત્પ્રવૃત્તિર્વિનીતિઃ
　　સાધ્વી રીતિઃ સમીચી કૃતિરતિવિમલા પ્રીતિરાસ્તિક્યવૃત્તિઃ ।
ન તઃ શસ્યા શુભંયુઃ પ્રકૃતિરથ સિતા સૌમ્યકીર્તિર્વિભૂતિ-
　　ર્લોકશ્લાઘ્યા ચિરસ્ય સ્થિતિમિહ તનુતામાર્યદેશે સ્વતન્ત્રે ॥ ૯૬॥

યેયં વીથી ચલન્તી હરતિ જનિમતો લોક્યતે યા સમસ્તૈ-
　　ર્યસ્યાં યાન્તો હસન્તઃ પુરત ઉપનતં નૈવ પશ્યન્તિ કૂપમ્ ।

તાં જાનન્તોઽપ્યસક્તાઃ પ્રખરપરિચયાસ્તત્પરસ્યાં વિભૂતૌ
    શશ્વદ્ભાસ્વત્પ્રભાયાં ભરતભુવમિમે શોભયન્ત્વધ્વનીનાઃ ॥ ૯૭॥

ચારિત્ર્યાણાં વિધાનં મનુજતનુભૃતાં સંવિધાનં શુચીનાં
    મર્યાદાનાં નિધાનં વિમલમતિમતાં યોગિનાં સન્નિધાનમ્ ।
આધાનં દિવ્યભાસાં પ્રકૃતિવિલસિતાગારમેકં પ્રધાનં
    રાષ્ટ્રં ન્યાયાવધાનં પ્રતિપદમયતે ભારતોચ્ચાભિધાનમ્ ॥ ૯૮॥

વિશ્વેશઃ સર્વશક્તિર્ગિરિવરતનયાસાહચર્યાર્ચિતશ્રીઃ
    સાન્દ્રાનન્દામૃતામ્ભોનિધિરમરસરિદ્વીચિવાચાલમૌલિઃ ।
સ્વાતન્ત્ર્યોલ્લાસલીલાં વિલસિતવિભવાં સર્વશોભાભિરામાં
    ભવ્યાં ભવ્યૈકભાવાં ભરતભુવમિમાં સર્વ્દા સમ્બિભર્તુ ॥ ૯૯॥

આસેતોરાહિમાનીવિશદતટભરાદદ્રિભૂપાલમૌલે
    રાસિન્ધોરાચવઙ્ગોદધિસલિલરુચેર્ભારતોર્વીવિભૂતેઃ ।
યાવચ્ચન્દ્રાર્કદીવ્યદ્દ્યુતિનુતિભરિતા દિવ્યગઙ્ગાઙ્ગશોભા
    પદ્યોન્માલેયમાસ્તામુરસિ સુમનસાં તાવદુલ્લાસિતશ્રીઃ ॥ ૧૦૦॥

ઐલાયગ્રામજન્મા વ્રજિતરસયુગક્રોશનીરેશમાર્ગઃ
    સૌમિત્રિઃ કાશિવાસી શતકસુમનસામમ્બિકાદત્તસૂનુઃ ।
શ્રીવિશ્વેશપ્રસાદોપનતકવિકૃતિપ્રાતિભાશ્ચર્યશક્તિઃ
    પ્રાલમ્બં મઞ્જુલીલં સુનયતિ તદુરઃ શ્રીમહાદેવશર્મા ॥ ૧૦૧॥

ઇતિ કાશીહિન્દૂવિશ્વવિદ્યાલયે સાહિત્યવિભાગાધ્યક્ષેણ
કવિતાર્કિકચક્રવર્તિના પણ્ડિતશ્રીમહાદેવશસ્ત્રિપાણ્ડેયેન
પ્રણીતં ભારતશતકં સમાપ્તમ્ ॥

કવિપરિચયઃ
કવિકુલગુરુવાણીનર્મમર્મોત્તરશ્રી
    રસભરપરિપાકો યસ્ય જાગર્ત્તિ કાવ્યે ।
તુલયતિ નહિ લોકે યઞ્ચ કશ્ચિદ્ વિપશ્ચિત્
    સ જયતિ બુધવર્યઃ શ્રીમહાદેવશાસ્ત્રી ॥

અખિલભરતખણ્ડે કૃત્સ્નશાસ્ત્રેષુ શિક્ષાં
    પ્રદદતિ કિલ શિષ્યા યસ્ય પારેસહસ્રમ્ ।
મતિરતિવિકલા નો નોન્મિષત્યદ્ય દિવ્યાં
    કથમથ કલયામો બોધશક્તિં તદીયામ્ ॥

અધ્યક્ષઃ મહામહોપાધ્યાય શ્રીચિન્નસ્વામિશાસ્ત્રી
વૈશાખકૃષ્ણપ્રતિપત્ ૧૯૯૯

સાર્વભૌમસંસ્કૃતપ્રચારપરિષત્ કાશીદ્વારા સમર્પિતાભિનન્દનદલાંશઃ

પ્રકાશકઃ સુરેશદત્તપાણ્ડેયઃ
સાહિત્યાચાર્યઃ સાહિત્યરત્નં
૧૯ અસી, કાશી ।

Encoded and proofread by Paresh Panditrao

*Bharata Shatakam*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*